# Vireshvara Stuti - 3

# વીરેશ્વરસ્તુતિઃ - ૩

## Document Information

Text title : Vireshvara Stuti - 3

File name : vIreshvarastutiH3.itx

Category : shiva, stuti, shivarahasya

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | harAkhyaH tRitIyAMshaH | pUrvArdham | adhyAyaH 47| 80-89 ||

Latest update : May 6, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 6, 2023

*sanskritdocuments.org*

# Vireshvara Stuti - 3

# વીરેશ્વરસ્તુતિઃ - ૩

॥ વીરેશ્વરસ્તુતિઃ - ૩ -  વારાણસીનાથાર્ચનમ્ ॥

સદ્ભસ્મનાઙ્ગાનિ વિલેપયામો રુદ્રાક્ષરત્નૈશ્ચ વિભૂષયામઃ ।
પઞ્ચાક્ષરં પાપહરં જપામો વારાણસીનાથ કિમાચરામઃ ॥ ૧॥

ધર્માણિ સર્વાણિ વિવેચયામઃ કર્માણ્યપારાણિ વિનાશયામઃ ।
શ્રીભાવલિઙ્ગં હૃદિ ભાવયામો વારાણસીનાથ કિમાચરામઃ ॥ ૨॥

કુન્દૈરમન્દૈઃ શિવમર્ચયામો વૃન્દારવૃન્દાશ્રયમાશ્રયામઃ ।
ગૌરીસમેતં સતતં ભજામો વારાણસીનાથ કિમાચરામઃ ॥ ૩॥

અહર્નિશં સાદરમિન્દિરાદિવૃન્દારનારીકવરીનિરુદ્ધમ્ ।
ગૌરીપદામ્ભોજયુગં સ્મરામો વારાણસીનાથ કિમાચરામઃ ॥ ૪॥

પરાત્પરં યન્મહતો મહાન્તં યદેકમવ્યક્તમનન્તરૂપમ્ ।
તદ્રૂપમેતદ્ધૃદિ ચિન્તયામો વારાણસીનાથ કિમાચરામઃ ॥ ૫॥

કાશીપુરીવીથિષુ સઞ્ચરામો ભવાદિનામાનિ સદા વદામઃ ।
શ્રીભાવમૂર્તિં બહુધા નમામો વારાણસીનાથ કિમાચરામઃ ॥ ૬॥

આરાધ્યમેકં શિવરૂપમેવ વિશ્વં પુરાણં તમસઃ પરસ્તાત્ ।
અનન્તકોટ્યર્કસમં ભજામો વારાણસીનાથ કિમાચરામઃ ॥ ૭॥

આનન્દકલ્લોલકુલાતિલોલલીલાવિલાસાલયશૈલવાલામ્ ।
ત્વાં કાલકાલં ચ વિલોકયામો વારાણસીનાથ કિમાચરામઃ ॥ ૮॥

ગઙ્ગામ્ભસા કુમ્ભસમન્વિતેન વાતેન શીતેન સુશીતલેન ।
વીરેશ્વરં ત્વામભિષિઞ્ચયામો વારાણસીનાથ કિમાચરામઃ ॥ ૯॥

જલામલૈઃ કોમલબિલ્વપલ્લવૈઃ શ્રૌતેન શુદ્ધોજ્વલભસ્મના ચ ।
વીરેશ લિઙ્ગાનિ સમર્ચયામો વારાણસીનાથ કિમાચરામઃ ॥ ૧૦॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે વીરેશ્વરસ્તુતિઃ - ૩ - વારાણસીનાથાર્ચનં સમ્પૂર્ણમ્ ॥

બૃહસ્પતિશતાનન્દસંવાદે વીરેશ્વરસ્તુતિવર્ણનં

- ॥ શ્રીશિવરહસ્યમ્ । હરાખ્યઃ તૃતીયાંશઃ । પૂર્વાર્ધમ્ । અધ્યાયઃ ૪૭। ૮૦-૮૯ ॥

- .. shrIshivarahasyam . harAkhyaH tRRitIyAMshaH . pUrvArdham . adhyAyaH 47. 80-89 ..

Proofread by Ruma Dewan

---

*Vireshvara Stuti - 3*

pdf was typeset on May 6, 2023

Please send corrections to *sanskrit@cheerful.com*